**বেদান্তসারসম্মতম্ অনুবন্ধচতুষ্টয়ং আলোচনম্(তাৎপর্যনির্ণয়ম্/ব্যাখ্যানম্)(5 Marks)**

শ্রীসদানন্দযোগীন্দ্রসরস্বতীপ্রণীতঃ'**বেদান্তসারঃ** একঃ প্রকরণগ্রন্থঃ।অস্মিন্ গ্রন্থে অধিকারি-বিষয়-সম্বন্ধ-প্রয়োজনং চেতি অনুবন্ধচতুষ্টয়ং আলোচিতম্।"অনু স্বজ্ঞানাৎ অনন্তরং বধ্নন্তি শাস্ত্রে বা গ্রন্থে বা আসজ্জন্তি প্রবর্তয়ন্তি-ইতি অনুবন্ধানি।" যথা, কেন পঠিতব্যো অয়ং গ্রন্থঃ,অস্য বিষয়ঃ কঃ?তথা অস্যাধ্যয়নস্য প্রয়োজনংকিম্?এতদেবানুবন্ধম্।

অধুনা বেদান্তসারসম্মতম্ অনুবন্ধচতুষ্টয়ং ময়া লিখ্যতে।

**অনুবন্ধচতুষ্টয়ম্-"তত্রানুবন্ধো নাম-অধিকারি-বিষয়-সম্বন্ধ-প্রয়োজনানি।"**শ্রীসদানন্দঃযোগীন্দ্রঃতদীয়ং **'বেদান্তসারঃ'**গ্রন্থমধ্যে অধিকারিবিষয়সম্বন্ধপ্রয়োজনংচেতি অনুবন্ধচতুষ্টয়ম্ উল্লিখিতবান্।

**ক) অধিকারিবর্ণনম্-"অধিকারী তু বিধিবৎ-অধীতবেদবেদাঙ্গত্বেন আপাততঃঅধিগত-অখিল-বেদার্থঃ অস্মিন্ জন্মনি জন্মান্তরে বা কাম্যনিষিদ্ধবর্জনপুরঃসরং নিত্য-নৈমিত্তিক-প্রায়শ্চিত্ত-উপাসনানুষ্ঠানেন নির্গত-নিখিল-কল্মষতয়া নিতান্ত-নির্মল-স্বান্তঃ,সাধনচতুষ্টয়সম্পন্নঃ প্রমাতা।"**অর্থাৎ এবং গুণবিশিষ্টঃ প্রমাতা এব বেদান্তশাস্ত্রাধ্যয়নস্য অধিকারী ভবতি।

**খ)বিষয়বর্ণনম্-"বিষয়ঃজীবব্রহ্মৈক্যং শুদ্ধচৈতন্যং প্রমেয়ং,তত্র এবং বেদান্তানাং তাৎপর্যাৎ।"**ব্যষ্টি-সমষ্টিগতাজ্ঞানবিজৃম্ভিতং কিঞ্চিজ্জত্ব-সর্বজ্ঞত্বাদি-বিরুদ্ধধর্মান্ পরিত্যজ্য অবশিষ্টং নিত্যশুদ্ধবুদ্ধব্রহ্মস্বরূপং শুদ্ধচৈতন্যং বেদান্তস্য বিষয়ঃ।

**গ)সম্বন্ধবর্ণনম্-"সম্বন্ধঃ তু তদৈক্য প্রমেয়স্য তৎপ্রতিপাদক-উপনিষৎ-প্রমাণস্য চ বোধ্যবোধকভাবলক্ষণঃ।"**অস্য গ্রন্থস্য প্রমেয়ং যৎ শুদ্ধচৈতন্যং তস্য প্রতিপাদকোপনিষৎ-প্রমাণস্য চ বোধ্যবোধকভাবঃসম্বন্ধঃ।অত্র বিষয়ঃভবতি **-'বোধ্যঃ',**বেদান্তবাক্যং ভবতি-**'বোধকঃ'।**

**ঘ)প্রয়োজনবর্ণনম্-"প্রয়োজনং তু তদৈক্য প্রমেয়গত অজ্ঞাননিবৃত্তিঃ স্বস্বরূপ-আনন্দ-অবাপ্তিঃ চ-'তরতি শোকম্ আত্মবিৎ' ইত্যাদি শ্রুতেঃ,'ব্রহ্ম বেদ ব্রহ্মৈব ভবতি' ইত্যাদি শ্রুতেশ্চ।"**

শাস্ত্রপাঠপূর্বং শাস্ত্রপাঠস্য প্রয়োজনং প্রতিপাদনং অবশ্যং কর্তব্যং।'কুতঃপ্রয়োজনমবিজ্ঞায় ন মন্দো অপি প্রবর্ততে'।অবাধিতং নিত্যং আনন্দস্বরূপস্য বোধ এব জীবস্য প্রয়োজনং,তস্মাদেব পুনর্জন্মনিবৃত্তিঃ সম্ভবঃ।